# Purana Mangala Shlokani Auspicious verses from Puranas

# पुराणमङ्गलश्लोकानि

## Document Information

Text title : purANamangalashlokAni Auspicious verses from Puranas

File name : purANamangalashlokAni.itx

Category : misc, subhaashita, mangala, purana

Location : doc_z_misc_general

Transliterated by : Vishwesh G. M.

Proofread by : Vishwesh G. M.

Latest update : September 10, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2022

*sanskritdocuments.org*

# पुराणमङ्गलश्लोकानि

विविधानि च रत्नानि संगृहीतानि वै मया ।
पठनं मननं कृत्वा नर प्राप्नोति सद्गतिम् ॥

संस्कृत में विविध स्तोत्र रत्नों का सङ्ग्रह किया गया है ।
इन स्तोत्रों के पाठ से अनेक कार्यों की सिद्धि तथा मनोरथों
की पूर्ति होती है ।

(१) शिवपुराण का मङ्गल -
ॐ आद्यन्त मङ्गलमजात समान भाव-
यायेतमीशमजरामरमात्म देवम् ।
पञ्चाननं प्रवल पञ्चविनोद शीलं
स भावये मनसि शङ्करमम्बिकेशः? ॥ १॥

(२) श्रीमद्भागवत् महापुराण का मङ्गल -
ॐ जन्माद्यस्य यतोऽन्वयादितरतश्चार्थे स्वभिज्ञः स्वराट्-
ते ने ब्रह्महृदा य आदि कवये मुह्यन्ति यत् सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ २॥

(३) ब्रह्मपुराण का मङ्गल -
ॐ यस्मात सर्वमिदं प्रपञ्चरचितं मायाजगज्जायते
यस्मिन् तिष्ठति याति चास्तसमये कल्पानुकल्पे पुनः ।
यं ध्यात्वामुनयः प्रपञ्चरहितं विन्दन्ति मोक्षं ध्रुवं
तं वन्दे पुरुषोत्तमस्यममलं नित्यं विभुं निश्चलम् ॥ ३॥

यं ध्यान्ति बुधाः समाधि समये शुद्धं वियत्सन्निभं
नित्यानन्दमयं प्रसन्नममलं सर्वेश्वरं निर्गुणम् ।
व्यक्ताव्यक्तपरं प्रपञ्चरहितं ध्यानैकगम्यं विभुं
तं संसारविनाशहेतुमजरं वन्दे हरिं मुक्तिदम् ॥ ४॥

(४) स्कन्दपुराण का मङ्गल -
यस्यज्ञाया जगत् श्रष्टा विरञ्चि पालको हरिः ।
संहर्ता कालरूपाख्यो नमस्तस्मै पिनाकिने ॥ ५॥

प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययम् ।
महादेवं महात्मानं सर्वस्य जगतः पतिः ॥ ६॥

(५) पद्मपुराण का मङ्गल -
ॐ स्वच्छं चन्द्रावदातं करिकरमकर क्षोभ सञ्जात फेनं
ब्रह्मोद्भूतिप्रसक्तैर्व्रतनियमपरैः सेवितं विप्र मुख्यैः ।
ॐकारालङ्कृतेन त्रिभुवन गुरुणा ब्रह्मणा दृष्टि भूतं
सम्भोगा भोग रम्यं जलमशुभहरं पौस्कर वः पुनातु ॥ ७॥

(६) वायुपुराण का मङ्गल -
ॐ जयति परासर सूनुः सत्यवती हृदयनन्दनो व्यासः ।
यस्याऽऽस्य कमलगलित वाङ्मयममृतञ्जगत्पिबति ॥ ८॥

(७) ब्रह्मवैवर्त्तपुराण का मङ्गल -
ॐ गणेश ब्रह्मेश सुरेश शेषाः
सुराश्च सर्वे मनवो मुनीन्द्रैः ।
सरस्वती श्रीःगिरिजादिकांश्च
नमन्ति देवाप्रणमन्ति तं विभुम् ॥ ९॥

स्थूलस्तनुं विदधतं त्रिगुणं विराजं
विश्वं विलोम विवरेषु महान्तमाद्यम् ।
सृष्ट्युन्मुखः स्वकलयापि ससर्ज सूक्ष्मं
नित्यं समेत्य हृदि यस्तमजं भजामि ॥ १०॥

अमृत परमपूर्ण भारती कामधेनु-
श्रुतिगण कृतवत्सो व्यासदेवो दुदोह ।
अनन्तरुचिपुराणं ब्रह्मवैवर्तमेतत् ।
पिबत पिबत मुग्धा दुग्धमक्षय्यमिष्टम् ॥ ११॥

(८) मार्कण्डेयपुराण का मङ्गल -
ॐ यद्योगिभिर्भवभयार्ति विनाश योग्य-
मासाद्य वन्दितमतीव विविक्त चित्तैः ।

तद्वत् पुनातु हरिपादसरोज युग्म
आविर्भवेत् क्रमविलङ्घित भूर्भुवः स्वः ॥ १२॥

पायात् स वः सकल कल्मष भेददक्षः
क्षीरोदकुक्षिफणिभोग निविष्ट मूर्त्तिः ।
श्वासावधूत सलिलोत्फणिका कराल
सिन्धु प्रनृत्यमिव यस्य करोति सङ्गात् ॥ १३॥

(९) लिङ्गपुराण का मङ्गल -
ॐ नमो रुद्राय हरये ब्रह्मणे परमात्मने ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तकारिणे ॥ १४॥

(१०) कूर्मपुराण का मङ्गल -
ॐ नमस्कृत्य प्रमेयाय विष्णवे कूर्मरूपिणे ।
पुराणं सम्प्रवक्ष्यामि यदुक्तं ब्रह्मयोनिना ॥ १५॥

(११) मत्स्यपुराण का मङ्गल -
प्रचण्ड ताण्डवाटोपे प्रक्षिप्ता येन दिग्गजाः ।
पातालादुत्पतिष्णो मकरसतयो यस्य ॥ १६॥

(१२) अग्निपुराण का मङ्गल -
ॐ श्रियं सरस्वतीं गौरीं गणेशं स्कन्दमीश्वरम् ।
ब्रह्माणं वह्निमिन्द्रादीन् वासुदेवं नमाम्यहम् ॥ १७॥

(१३) वामनपुराण का मङ्गल -
ॐ त्रैलोक्य राज्यमाच्छिन्द्य वलेरिन्द्राय यो ददौ ।
नमस्तस्मै सुरेशाय सदा वामनरूपिणे ॥ १८॥

(१४) नारदपुराण का मङ्गल -
ॐ वन्दे वृन्दावनासीनमिन्दिरानन्द मन्दिरम् ।
उपेन्द्रं सान्द्रकारुण्यं परानन्दं परात्परम् ॥ १९॥

(१५) विष्णुपुराण का मङ्गल -
ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ २०॥

(१६) वराहपुराण का मङ्गल -
ॐ नमस्तस्मै वराहाय लीलयोद्धरते महीम् ।

खुरमध्यगतो यस्य मेरुः खणखणायते ॥ २१॥

दंष्ट्राग्रेणोद्धितागौरुदधिपरिवृतः पर्वतैनिम्नगाभिः
साकं मृत्पिण्डवत् प्राग्बृहदुरुवपुषाऽन्तरूपेण येन ।
सोऽयं कंसासुरारि मुर नरकदशास्यन्त कृत् सर्वसंस्थः
कृष्णो विष्णुः सुरेशो नादतु मम रिपूनादिदेवोवराहः ॥ २२॥

(१७-१८) गरुडपुराण तथा ब्रह्माण्डपुराण का मङ्गल -
ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जय मुदीरयेत् ॥ २३॥

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

(महर्षि वेदव्यास जी ने अठारह पुराणों में दो विशिष्ट बातें
कही हैं । परोपकार करना पुण्य है और पाप का अर्थ होता
है दूसरों को दुःख देना ।
Amidst all the 18 Puranas, know only two
gospels of Maharshi Vyas to be true, that doing
good to others conduces to merit and doing harm
to them leads to Sin.)

श्रूयतां धर्म सर्वस्वं श्रुत्त्वा चैवाऽवधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

(धर्म का सर्वस्व क्या है, सुनो और सुनकर उस पर चलो । अपने को
जो अच्छा न लगे, वैसा आचरण दूसरे के साथ नही करना चाहिये ।
Listen to the Code of Life, once listened,
never forget it. Never impose anything on
others that you would not like to go through.
This alone is the gist of Dharma.
— Panchatantra Verse 3.104.)

इति पुराणानान्तर्गता मङ्गलानि श्लोकानि ।

Encoded and proofread by Vishwesh G. M.

*Purana Mangala Shlokani Auspicious verses from Puranas*

pdf was typeset on September 14, 2022

Please send corrections to *sanskrit@cheerful.com*